# AdityAShTakam

# આદિત્યાષ્ટકમ્

## Document Information

Text title : AdityAShTakam

File name : AdityAShTakam.itx

Category : aShTaka, navagraha

Location : doc_z_misc_navagraha

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : Devi book stall, Kodumgallur, Kerala

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : August 6, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# આદિત્યાષ્ટકમ્

ઉદયાદ્રિમસ્તકમહામણિં લસત્-
કમલાકરૈકસુહૃદં મહૌજસમ્ ।
ગદપઙ્કશોષણમઘૌઘનાશનં
શરણં ગતોઽસ્મિ રવિમંશુમાલિનમ્ ॥ ૧॥

તિમિરાપહારનિરતં નિરામયં
નિજરાગરઞ્જિતજગત્ત્રયં વિભુમ્ ।
ગદપઙ્કશોષણમઘૌઘનાશનં
શરણં ગતોઽસ્મિ રવિમંશુમાલિનમ્ ॥ ૨॥

દિનરાત્રિભેદકરમદ્ભુતં પરં
સુરવૃન્દસંસ્તુતચરિત્રમવ્યયમ્ ।
ગદપઙ્કશોષણમઘૌઘનાશનં
શરણં ગતોઽસ્મિ રવિમંશુમાલિનમ્ ॥ ૩॥

શ્રુતિસારપારમજરામયં પરં
રમણીયવિગ્રહમુદગ્રરોચિષમ્ ।
ગદપઙ્કશોષણમઘૌઘનાશનં
શરણં ગતોઽસ્મિ રવિમંશુમાલિનમ્ ॥ ૪॥

શુકપક્ષતુણ્ડસદૃશાશ્વમણ્ડલં
અચલાવરોહપરિગીતસાહસમ્ ।
ગદપઙ્કશોષણમઘૌઘનાશનં
શરણં ગતોઽસ્મિ રવિમંશુમાલિનમ્ ॥ ૫॥

શ્રુતિતત્ત્વગમ્યમખિલાક્ષિગોચરં
જગદેકદીપમુદયાસ્તરાગિણમ્ ।
ગદપઙ્કશોષણમઘૌઘનાશનં
શરણં ગતોઽસ્મિ રવિમંશુમાલિનમ્ ॥ ૬॥

શ્રિતભક્તવત્સલમશેષકલ્મષ-
ક્ષયહેતુમક્ષયફલપ્રદાયિનમ્ ।
ગદપઙ્કશોષણમઘૌઘનાશનં
શરણં ગતોઽસ્મિ રવિમંશુમાલિનમ્ ॥ ૭॥

અહમન્વહં સતુરગક્ષતાટવી
શતકોટિહાલકમહામહીધનમ્ ।
ગદપઙ્કશોષણમઘૌઘનાશનં
શરણં ગતોઽસ્મિ રવિમંશુમાલિનમ્ ॥ ૮॥

ઇતિ સૌરમષ્ટકમહર્મુખે રવિં
પ્રણિપત્ય યઃ પઠતિ ભક્તિતો નરઃ ।
સ વિમુચ્યતે સકલરોગકલ્મષૈઃ
સવિતુસ્સમીપમપિ સમ્યગાપ્નુયાત્ ૯॥

ઇતિ આદિત્યાષ્ટકં સમાપ્તમ્ ॥

Proofread by PSA Easwaran

*AdityAShTakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*